**पत्रिका– २**

**संस्कृतवाक्यान्यङ्ग्रेजीभाषया विद्यार्थिनो विपरिणमयेयुः।**

१) शम्भुर्जयति।

२) रामो बन्धुषु स्नेहेन वर्तते।

३) मधुनि माधुर्यमस्ति।

४) कविषु कालिदासः श्रेष्ठः।

५) पितृव्यः पितुर्भ्राता।

६) वस्तुन्यवस्त्वारोपोऽज्ञानम्।

७) भीमस्य भ्रातर्यर्जुने कर्णो बाणानमुञ्चत्।

८) तूलस्य राशावग्नेरिव मृदुनि मृगस्य शरीरे निशितस्य बाणस्य पातः।

९) तनुषु विभवेषु ज्ञातिभिस्त्यज्यन्ते नराः।

१०) अप्रियस्यापि पथ्यस्य वक्तृणि मित्रेऽलं क्रोधेन।

११) नप्तुर्लाभोऽतीवोत्कण्ठा भारतवर्षीयाणाम्।

१२) कन्यां जामातुर्गृहं नयति।

१३) जनानां धर्मेऽभिलाषो वर्धताम्।

१४) जलं पातुं नदीमगच्छत्।

१५) कुम्भकारेण घटः कृतः।

१६) शम्बुकेन कथितां वार्तां श्रुत्वा रामोऽमुह्यत्।

१७) नद्यास्तीरे चिरं विहृत्योटजं निवृत्ता सीता।

१८) शत्रुञ्जित्वा नगरीं प्राविशत्।

१९) क्लेशः सोढः सीतया।

२०) पङ्के पतितां धेनुमुद्धरति।

२१) चन्द्रस्य प्रकाशः शरद्याह्लादको भवति।

२२) पश्यतो गुरोः शिष्येणानादरः कृतः।

२३) दिनेषु गच्छत्सु नारायणः पण्डितोऽभवत्।

२४) प्राणानामत्ययेऽप्यसन्तः सद्भिर्नाभ्यर्थ्यन्ते।

२५) सन्देहे सतामन्तःकरणस्य प्रवृत्तयः प्रमाणम् ।

२६) अकालो नास्ति धर्मस्य जीविते चञ्चले सति ।

२७)अनिजीविने कुप्यति भर्ता ।

२८)ब्रह्मणः प्रजाः प्रजायन्ते ।

२९)कृष्णो वसुदेवस्य सद्मनि वसन्नम्बरादवतरन्तं नारदमपश्यत् ।

३०) उद्यन्तं चन्द्रमसं प्रेक्षस्व ।

३१) गोपो धेनू रक्षति ।

३२) पित्रोर्गुरोश्च वचनमनुतिष्ठ ।

३३) अश्वमारोढुं मतिर्जाता ।

३४)नृशंसभ्यो गुणवतामपि भयं विद्यते ।

३५) विद्युता सह मेघो वियति वर्तते ।

३६) वत्स आयुष्मान् भव ।

३७)जयतः शत्रून् मोपेक्षस्व ।

३८)भवद्भिरादिष्टः किङ्करो नगरमगच्छत् ।

३९)नमो भगवते वासुदेवाय ।

४०)हुतभुजा दग्धमरण्यमपश्यन्नलः ।

४१)महीं शासति दशरथे भूभृति जनाः सुखभाजोऽभवन् ।

४२)मरुतां भर्तार्जुनं द्रष्टुमिच्छति ।

४३)कवीनां वाक्षु माधुर्यमस्ति ।

४४)सुहृदोर्वचनमलङ्घनीयम् ।

४५)घटा मृदो विकारा अलङ्काराश्च सुवर्णस्य ।

४६)इह जगति पुत्रस्योद्भव उत्सवस्य हेतुः ।

४७) विपद्युच्चैः स्थीयते सद्भिः ।

४८) दृशदि निषण्णो गुरुः शिष्यान् धर्ममुपादिशत् ।

४९)अधमर्णाः सर्वथा परवन्तो भवन्ति ।

५०)अकालो नास्ति धर्मस्य जिविते चञ्चले सति ।